rtmnuonline.com



# Bachelor of Science (B.Sc.) Semester—II (C.B.S.) Examination

## SANSKRIT

## Compulsory Paper—2

समय: — होरात्रयम्] [पूर्णाङ्का: — 60

**सूचना** :—विशेषनिर्देशाभावे उत्तराणि स्वीकृतभाषया लिखत।

1. द्रोणाचार्य: कं श्रेष्ठं शिष्यम् अमन्यत ? किमर्थं च ? 12

**अथवा**

कौत्स: रघुं प्रति किमर्थम् आगतवान् ? रघुणा तस्य इच्छा कथं पूरिता इति सविस्तरं लिखत।

2. सारांशं लिखत :— 12

मम भारतं विजयते।

**अथवा**

तिलक प्रशसा।

3. (अ) अनुवादं कुरुत :— 6

यस्यास्ति वित्तं स नर: कुलीन:
स पण्डित: स श्रुतवान् गुणज्ञ:।
स एव वक्ता स च दर्शनीय:
सर्वे गुणा: काञ्चनमाश्रयन्ते।।

**अथवा**

या पाणिग्रहलालिता सुसरला तन्वी सुवंशोद्भवा
गौरी स्पर्शसुखावहा गुणवती नित्यं मनोहारिणी।
सा केनापि हृता तया विरहितो गन्तुं न शक्तोऽस्म्यहं
रे भिक्षो तव कामिनी नहि नहि प्राणप्रिया यष्टिका।।

(ब) निम्नलिखितं पद्यं पठित्वा प्रश्नानाम् उत्तराणि **संस्कृतेन** लिखत :— 6

धत्ते भरं कुसुमपत्रफलावलीनां
धर्मव्यथां वहति शीतभवां रुजं च।
यो देहमर्पयति चान्यसुखस्य हेतो:
तस्मै वदान्यगुरवे तरवे नमोऽस्तु।।

(1) कुसुमपत्रफलावलीनां भरं क: धत्ते ?

(2) वृक्ष: किं किं वहति ?

(3) तरु: कस्य हेतो देहम् अर्पयति ?

(4) तरो: कृते पद्ये किं विशेषणं प्रयुक्तम् ?

(5) अनेन पद्येन कवि: कस्य प्रशंसां करोति ?

(6) इदं पद्यं कस्मात् पाठात् गृहीतम् ?

rtmnuonline.com

4. टिप्पणी **द्वयं** लिखत :— 12

(i) भर्तृहरि:

(ii) विष्णुशर्मा

(iii) डॉ. श्री. भा. वर्णेकर:

(iv) नीलकण्ठदीक्षित:।

5. वाक्य**द्वय**स्य ससंदर्भ स्पष्टीकरणं लिखत :—

(अ) तस्मात् पुत्र इति प्रोक्त: पितृन् य पाति सर्वत:। 3

**अथवा**

स्वधर्मे निधनं श्रेय एवमाह मम प्रिय:।

(ब) किं किं न साधयति कलपलतेव विद्या। 3

**अथवा**

कन्यानिर्माष्टि मन्दिरम्।

(क) अनुरूपं योजयत : 3

| | अ | | ब |
|---|---|---|---|
| (i) | रामभरतयो: संवाद: | (क) | नीलकण्ठदीक्षित: |
| (ii) | कलिविडम्बनम् | (ख) | बापूजी अणे |
| (iii) | तिलकप्रशंसा | (ग) | वाल्मीकि: |

(ड) अनुरूपं योजयत : 3

| | अ | | ब |
|---|---|---|---|
| (i) | जगन्नाथपण्डित: | (क) | नैषधीयचरितम् |
| (ii) | श्रीहर्ष: | (ख) | मृच्छकटिकम् |
| (iii) | शूद्रक: | (ग) | गङ्गालहरी। |

835 835 835 835 835
www.rtmnuonline.com
www.rtmnuonline.com